वेदान्त. भट्टाचार्यपञ्चाननद्युपाह्व गट्टुलालशर्मणः

५७ अं-८३

१५९२

Pt. Shri Gattulalaji Research Centre

॥श्रीगणेशायनमः॥ श्रीविष्णवेनमः॥ अथनारदपंचरात्र्युक्तस्तथाविष्णुरहस्योक्तोविष्णुयज्ञविधिर्लिख्यते॥ ॥श्री
१ नारदउवाच॥ विष्णुयागःकथंकार्यो ब्रूहित्वंमेपितामह॥विधानंतत्रकिंप्रोक्तंकेनकार्योमखोमहान्॥१॥ अंगंतुत-
त्रकिंप्रोक्तं प्रधानंतत्रतद्वद॥कीदृशास्तुद्विजास्तत्रवृणुयात्कतिसंख्यया॥२॥ त्याज्यास्तत्रप्रयत्नेन तन्नोवदवि
दांवर॥सामग्रीतत्रकाप्रोक्ताकुत्रकार्योमखोत्तमः॥३॥सर्वेषामेवयज्ञानांप्रधानोहिमखोयतः॥ एतंवदमहाप्राज्ञ
यथोक्तंविष्णुनापुरा॥४॥ तत्सर्वंवदमेब्रह्मन्विस्तरेणसमन्वितं॥विस्तारोमंडपस्यैवध्वजानांचतथैवच॥५॥ द्वार
तोरणमानानिभूमेश्चैवतुशोधनं॥ध्वजमानंवैष्णवेचोक्तंवंशमानंतथैवच॥६॥ चिह्नंवैवैष्णवेयज्ञेतोरणोपरिया
दृशं॥ आकारोवैध्वजानांचपताकानांतथैवच॥७॥ पीठमानंकथंप्रोक्तंकुंडमानंतथोच्यतां॥ शैववैष्णवयोर्भेदो
यागेतुयुक्तितोवद॥८॥ स्तंभानांवल्लीकर्नांचमानसामान्यतोवद॥आच्छादनंचाकिंप्रोक्तं वस्त्राणिकीदृशानिवै॥९॥

Pt. Shri Gattulalji Research Centre

पा र्दार्थाः किंविधाः प्रोक्ताः संख्यानेषां च कास्मृता॥ ब्राह्मणाः कति संख्याकालक्षणं नेषां किंस्मृतं॥ १०॥ वर्जनीयाश्च
केब्रह्मन् तेषामपि च लक्षणं॥ विधिना ब्रूहि सकलं सर्वेषामुपकारकं॥ ११॥ को विधिर्ब्राह्मणानां च क्षत्रियाणां
२ चैहृद॥ विशांतु कीदृशः प्रोक्तस्तन्मे वद मते॥ १२॥ अन्येषां च कथं कार्यस्तत्र ब्रूहि समासतः॥ मानं तु मंडपादीनां
कुंडस्य च तथैव च॥ १३॥ अर्चनं देवदेवस्य विदमोऽस्यैव महात्मनः॥ यागोपयोगि तत्सर्वं तन्मे वदतु सांप्रतं॥ १४॥
यदुचिकरं देवस्य तत्सर्वं वक्तुमर्हसि॥ अनुग्राह्योऽहं देव तन्मे वद वारिज॥ १५॥ श्रीब्रह्मोवाच॥ साधु साधु
महाभाग विष्णुभक्तोऽसि निर्मम॥ नेदं पृष्टं च केनापि विष्णुयागविधानकं॥ १६॥ पावनं सर्वलोकानां तीर्थानां चो
वतीर्थकं॥ कल्याणं सर्वलोकानां श्रुते सर्वत्र जायते॥ १७॥ नेदं देवेषु कथितं दानवेषु न विद्यते॥ मनुष्या नैव जा
नंति नागेषु नैव विद्यते॥ १८॥ पितरो नैव जानंति कव्यादयो यथा तथं॥ सनकादिभिः पुरा पृष्टं यत्त्वं पृच्छसि पुत्रक

Pt. Shri Gattulalaji Research Centre

२ १९॥ तेषांचैवयथाप्रोक्तंतथाशृणुसमासतः॥ गोपनीयंसदावत्सवैष्णवानांहितकृत्सदा॥२०॥ येवैष्णव
तमाल्लोकेतेषांगोप्यतमंचतत्॥ यत्पृष्टस्तुत्वयापुत्रकृतोलोकहितायवै॥२१॥ तदेवंकथयिष्यामिवैष्ण
वानांतुदैवतं॥ सर्वेषुचैवदेवेषुशास्त्रेषुह्यखिलेष्वपि॥२२॥ अत्रशास्त्रेषुसुतरांयत्तुपुण्यतमंमतं॥ तत
स्पृष्टंत्वयावत्सलोकानांहितकाम्यया॥२३॥ येवैष्णवतमाल्लोकेतेषांहर्षाभिवर्द्धनं॥ तस्मात्तेकथयिष्यामि
समूलंविष्णुनोदितं॥२४॥ तत्सर्वंशृणुदेवर्षेविष्णोर्यागस्यविस्तरं॥ आचार्यंपूर्वमाहूयकुलीनंवेदपार
गं॥२५॥ सदाचारंविधिज्ञंचयागतत्वार्थकोविदं॥ वैष्णवंशास्त्रतत्वज्ञंधर्मानुष्ठानतत्परं॥२६॥ शिव
दुर्गादिमंत्राणांतत्वज्ञंकर्मसाधकं॥ तादृशंचपुरस्कृत्यमंडपादिसमाचरेत्॥२७॥ मंडपःसर्वयागेषुमु
ख्यमंगंयतोभवेत्॥ भूमेस्तुशोधनंपूर्वंशास्त्रोक्तविधिनासदा॥२८॥ विशल्यापूर्वतःकार्याखनना

द्विभिर्यत्नतः॥शोधितायां समायां च मंडपादि समाचरेत्॥ २९॥ भूमिशुद्धिर्यतो प्यंगं मुख्यमाहुर्मनीषिणः॥
आधाराद्वैयतो भूश्च सर्वेषां प्राणिनां यतः॥३०॥ तस्माद्विशोधनं प्रोक्तं ऋषिभिर्वेददादिभिः॥ कारणं सर्व
बीजानामाधारः परमो यतः॥३१॥ एतां देवाः प्रशंसंति यातु वैश्यवीनामभृत्॥ तस्मात्तु मंडपाद्यां यां मंडपं सा
धयेत्सुधी॥३२॥ ॥इति श्री वैष्णवसिद्धांते ब्रह्मनारदसंवादे भूशोधनादिप्रकरणं॥ ॥श्री॥ अथ
मंडपस्वरूपमाह॥ श्रीब्रह्मोवाच॥ दशद्वादशहस्तो वा कल्याहस्तोऽथवा पुनः॥ धृतिहस्तमितः का-
र्यो नखहस्तोऽथवा पुनः॥१॥ एतानि मंडपमानानि प्रोक्तानि हि पुरातनैः॥ वैष्णवे उत्तमं मानं कर्तव्यं कर्म
सिद्धये॥२॥ उत्तमं वैष्णवे प्रोक्तं उत्तमत्वात्तथैव च॥ कलाहस्तः षोडश हस्तः॥ धृतिहस्तः अष्टादश हस्तः॥
नखहस्तो विंशति हस्तः॥ एते श्रेष्ठाः॥ यदा मंडपद्वयं कुर्यात्तदा प्रथममंडपमितमंतरं त्यक्त्वा द्वितीयं

Pt. Shri Gattulalaji Research Centre

३ मंडपंकुर्यात्॥ यदाधामाग्रे मंडपः क्रियते तदातद्धामपरिमाणमंतरंत्यक्त्वामंडपंकुर्यात् इत्यर्थः॥ ॥
कद्वैः सद्भिस्तु संछाद्या विजयाद्यास्तुमंडपाः॥ द्वाराणि चैव चत्वारी मंडपेदिक्षुकारयेत्॥३॥ उत्तमाधममध्ये
षुतथोक्तानि सनातनैः॥ उत्तमेहिकरंप्रोक्तं अष्टांगुलसमन्वितं॥४॥ मध्यमेहिकरंप्रोक्तं चतुरंगुलसंयुतं॥
अधमेहिकरंप्रोक्तमेतन्मानमुदाहृतं॥५॥ अश्वत्थोदुंबरप्लक्षवटशाखाकृतानितु॥ मंडपस्यप्रतिदिशं द्वा
रतोरणमुच्यते॥६॥ पंचहस्तप्रमाणंतु विस्तरेणद्विहस्तकं॥ षडंगुलाभिवृद्धंतु सप्तहस्तंतथोत्तमे॥७॥
पंचहस्तंकनिष्ठेतु मंडपेपंचहस्तकं॥ तोरणानांच विस्तारः प्रोक्तोवैविष्णुनास्वयं॥८॥ मस्तकेद्वादशांशेन
शंखचक्रगदांबुजं॥ प्रागादिक्रमयोगेनन्यसेतेषांस्वदारुजं॥९॥ पंचमांशंन्यसेभूमौ सर्वसाधारणोविधिः॥
हस्तमात्रपरित्यज्यपुरतस्तोरणंन्यसेत्॥१०॥ एवंतुमंडपंकृत्वापंचगव्येनप्रोक्षयेत्॥ मंडपेध्वजानांविन्यासः

कार्यश्चैव यथाक्रमं॥ तत्रचैवपताकानांन्यासः प्रोक्तो ध्वजाक्रमात्॥ ११॥ सप्तहस्ताध्वजाः प्रोक्ताः सप्तमांशे
नविस्तृताः॥ पताकाः पंचहस्तास्युःपंच मांशेनविस्तृताः॥ १२॥ लोकपालानुवर्णेन नवमीतुहिनप्रभा॥ पीत
रक्तादिवर्णाश्च कार्याश्चैव सदाबुधैः॥ १३॥ द्विपंचहस्तैर्दंडैश्च वंशजैः संयुतामता॥ द्विपंचहस्ते दशहस्तेरि
त्यर्थः॥ ॥दंडाः पंचहस्ता वा कार्याः॥ इत्यन्ये॥ महाध्वजस्यदंडोदशहस्त एव॥ तस्यमहाध्वजस्य प्रमाणंद
शहस्तमात्रं॥ विस्तारेतुत्रिहस्तकः॥ सिंदूराकंबूराधूम्राधूसराघसन्निभा॥ हरितापांडुवर्णाश्च सुभ्राप्र
वीदितःक्रमात्॥ एवंवर्णास्शुभाःकार्याःपताकाः पाकशासनी॥ १५॥ उल्लेचंतत्र बध्नीयात् वेद्यामुपरिय-
त्नतः॥ शिखांवेष्टेत वस्त्रेण छादनं सर्वतःस्मृतं॥ १६॥ मध्यभागेतु वेदीस्यात् इष्टकाभिः प्रकल्पयेत्॥ मध्य
वेदीप्रमाणेन पंचमांशेनचोछ्रितां॥ १७॥ प्रकुर्यात् वेश्मवे यागेविष्णोरासनमुत्तमं॥ लेपनंगोमयेनैव पंचगव्ये

४ तम्प्रोक्षयेत्॥ १८॥ रंजितंसर्वतः कार्यनानावर्णैश्चशोभितं॥ विष्णोरायतनंदिव्यंचित्रितंगैरिकादिभिः॥ १९॥ तस्मिं
रम्यंप्रकर्तव्यंसर्वतोभद्रमंडलं॥ पद्मंवापिप्रकुर्वीतसनकादिगणसेवितं॥ २०॥ तस्योपरिन्यसेत्पीठंश्रीपर्णानि
र्मितंशुभं॥ चतुर्विंशांगुलंकार्यंवैपुल्येद्वादशांगुलं॥ २१॥ षोडशांगुलकंवापिचोछ्रायश्चतुरंगुलः॥ श्वेतवस्त्रेण
संछाद्यपीतेनचततःपरं॥ २२॥ तदुपरिन्यसेत्पद्मंरुक्मजंमणिभूषितं॥ नारायणंन्यसेत्तत्रसुवर्णैर्वसुसंख्य
कैः॥ २३॥ निर्मितंवैश्रियायुक्तंपरितोदेववेष्टितं॥ पूर्वोक्तेनैवमानेनतदर्द्धेनचापुनः॥ २४॥ गुरुडःस्वर्णमयः
कार्योद्वारपालकसंयुतः॥ तावपिस्वर्णमयौकार्यौदिक्पालैश्चैववेष्टितौ॥ २५॥ शिवब्रह्मादिभिर्युक्तंशक्त्य
ष्टकसमन्वितं॥ नंदादिपार्षदैर्युक्तंशेषभोगोपरिस्थितं॥ २६॥ चक्रादिआयुधैर्युक्तंवनमालाविभूषितं॥ एता
दृशंप्रतिष्ठाप्यभक्तानामभयाप्रदं॥ २७॥ वेदिपादोत्तरंत्यक्त्वकुंडंकार्यंचपश्चिमे॥ एकहस्तंद्विहस्तंवात्रिहस्तंच

तुर्ईस्तकं॥२८॥ होमानुसारतः कुंडं कर्त्तव्यं शास्त्रसंमितं॥ चतुरस्रं प्रकर्त्तव्यं योनिवक्त्रोपशोभितं॥२९॥ मे
खलात्रयसंयुक्तं कंठं कृत्वा विधानतः॥ नाभिनालसमोपेतं मुख्यांगं यागसाधकं॥३०॥ एतादृशो यदा कार्यो
मंडपः कार्यसिद्धये॥ आदौ गणपतेश्चैव पूजनं विघ्ननाशकं॥३१॥ मंडपे तत्र पीठानि कार्याणि तु यथाक्रमं॥ ई
शान्यां रुद्रपीठं तु द्विहस्तपरिसंमितं॥ तदुक्तं वैष्णवतंत्रे॥ चतुस्त्रिंशांगुलप्रोक्तमुच्छ्राये द्वादशांगुलं॥३२॥ पूर्वे
तु क्षेत्रपालस्य पीठं कुर्याच्च वैष्णवे॥ द्वादशांगुलं भवेदुच्चं द्विहस्तेन च विस्तृतं॥३३॥ आग्नेय्यां शक्तिपीठं तु मातृ
णां तत्र पूजनं॥ द्वादशांगुलं भवेदुच्चं द्विहस्तेन च विस्तृतं॥३४॥ दक्षिणे गणपतिपीठं हस्तमात्रं तु कारयेत्॥ नै
ऋत्यां वास्तुपीठं तु तद्वत्कुर्याद्विचक्षणः॥३५॥ योगिन्याः पीठकं कार्यं वायव्यां तद्वदेव हि॥ उत्तरे स्थानपीठं तु ग्र
हाणां स्थानकं शुभं॥३६॥ पीठानि सर्वकार्याणि कोणमध्यगभेतः॥ एवं पीठादिकं कृत्वा स्थापयेत्तत्र देवतां॥

५ ३७॥ यथाक्रमंयथास्थानंस्थापनंक्रमतःस्मृतं॥ सदासमार्जयेत्स्युद्धांकुंडमंडपवेदिकां॥ ३८॥ पुनश्चगोम
येनैवमृत्तिकाभिश्चलेपयेत्॥ पंचगव्येनस्युद्धेनप्रोक्षणंसर्वतोमतं॥ ३९॥ द्रव्याणिशक्तितोनीत्वामंडपेतानि
स्थापयेत्॥ यवव्रीहिकुशादुर्वादधिचंदनसर्षपा॥ ४०॥ सिद्धार्थरोचनाचैवफलानिविविधानिच॥ नदीसंग
मतीर्थस्यमृत्तिकांतुसमाहरेत्॥ ४१॥ संलिप्यमंडपस्थानंगोमयेनस्युभेनवै॥ गंधकुसुमपूंगानिधूपंचैव
समाहरेत्॥ ४२॥ संलिप्यस्वस्तिकंकुर्यात् आचार्योब्राह्मणैःसह॥ वस्त्राणिचैवस्युभ्राणिउर्णाश्चकुंडलानि
च॥ ४३॥ मुद्रिकाचार्घपात्राणिमधुपर्कार्थंपयस्विनीं॥ उष्णीषानिहिरण्यंचपात्राणितत्रस्थापयेत्॥ ४४
घंटापारात्रिकांचैवधूपपात्रंतथैवच॥ हैमंविष्णोःस्वरूपंचलक्ष्म्याचैवतुसंयुतं॥ ४५॥ स्नानार्थहैमपात्रंच
राजतंताम्रमेवच॥ कंधरामर्घपात्रंचशंखंचपांचजन्यकं॥ ४६॥ चंदनागरुकर्पूरकस्तूरिकुंकुमानिच॥ म

श्चनेवैन्पाज्याश्चदूरतः॥ ७॥ वैष्णवाः कर्मनिरताः प्रतिग्रहपराङ्मुखाः॥ नियोज्या वैष्णवे यागे स्फुरत्सु
ख्याद्विजोत्तमाः॥ ८॥ शुद्धवंशसमुत्पन्ना वैष्णवाश्च जितेंद्रियाः॥ एतेविप्रा प्रशस्ता वै यागकर्मविशार-
दाः॥ ९॥ एषुआचार्यकः प्रोक्तो वैष्णवो वेदपारगः॥ द्विजश्रेष्ठो महात्मा च कुशलो विष्णुकर्मणि॥ १०॥ वेद
शास्त्रार्थसंपन्नः सर्वकार्यार्थसाधकः॥ अथ विष्णुपुराणे॥ आचार्यादीनां लक्षणं॥ ज्ञानोदारमनाः
कल्पसुकुशलः कर्मण्यभिक्ष्यः सुधीः संतुष्टः शिवतत्त्वपरः सततयो निर्मत्सरः पापभीः॥ आचार्योनि
र्मेयमागमतत्त्वचतुरः कर्माद्वे विप्रान्वितः॥ प्रारंभं कुरुते सदारमनघं कर्त्तारमावेदयन्॥ ११॥ गुरुश्च वेदार्थ
विचारदक्षः समुद्भवः शीलकुलाभियुक्तः॥ कार्यः पुराणाभिरतो निदक्षः प्रसन्नगंभीरसरस्वतीकः॥ १२
॥ पीतांबरः कुंडलहेमसूत्रः केयूरकंठाभरणाभिरामः॥ अथर्त्विजो वेदविदश्च कार्याः सुरूपवेषान्वयशील

७ पुक्ताः॥ विधानदक्षाः पटवोनुकूलाये चार्य देशप्रभवा द्विजेंद्राः॥१३॥ पूर्वेण ऋग्वेदविदो च कार्यौ यजु
र्विदो दक्षिणतश्च नहन्॥ स्थाप्यो द्विजो सामविदो च पश्चात् चाथर्वणौ तूत्तरतश्च कार्यौ॥१४॥ सर्वे
लक्षणसंपुक्ता विधिज्ञा विजितेंद्रियाः॥ कुलकुलसमायुक्ता ब्राह्मणा वेदपारगाः॥१५॥ स्थापनीयाः
क्रमेणैव पूर्वादि क्रमयोगतः॥ पुनर्वर्ज्यो नाउप्रेतकर्मरतश्चोरः परदाररतस्तथा॥ कुचैलः कर्कशः
कोपी चाकुलीधनगर्वितः॥ कुनखी कुब्जहीनांगः कृष्णः कुष्ठी तथैव च॥ आयाज्य याजको मूर्खो गण
को वैद्य एव च॥१९॥ प्रतिग्रहाग्निदग्धश्च जपहोमविवर्जितः॥ नस्य मंत्राश्च निर्वीर्यास्तत्कृतं कर्मनि
ष्फलं॥२०॥ एतादृशास्तु संवर्ज्या ऋत्विगाचार्य सर्वशः॥ व्याधिनं वामनं चैव वृषलं नत्र वर्जयेत्॥२१॥
नातिकृष्णं वातिगौरं नावेक्षवमभापिवा॥ एतादृशान् वर्जयित्वा यत्तकर्म समारभेत्॥२२॥ परीक्ष्य-

ब्राह्मणान्सर्वान्मधुपर्कैर्विधिंचरेत्॥ सुगुप्ते शोभने स्थाने सुरूपे यज्ञमंडपे॥ २३॥ आसयेदासनेषु वि
प्रान्कोमलेश्वेतकंबले॥ प्राङ्मुखानथकर्त्तासावास्ते स्वयमुदङ्मुखः॥ २४॥ ॥अथ मधुपर्कप्रयोगः॥
विशिष्टकालपर्यंतं कालं संकीर्त्य कीर्त्तयेत्॥ मम सर्वकुटुंबस्य सर्वविघ्नोपशांतये॥ २५॥ उत्पन्नो
त्पत्स्यमानोपसर्गोपसृष्टनश्यये॥ स्त्रीपुत्रधनधान्यादिकामनापरिपूर्त्तये॥ २६॥ प्राक्जन्मकोटिलग्नानां गुरुलघ्वा
दिपापानां॥ महत्याः मत्यासकृन्नित्याः त्यंताभ्यासकृतां हसां॥ २७॥ महापापादिपापानां सर्वेषां चापनुत्तये॥ प्रीतये प
रमेशस्य भूरिभावाप्तये पुनः॥ कृतस्य क्रियमानैस्यैणे करिष्यमाणकर्मणः॥ सम्यक्शुभफलावाप्त्यै प्राप्त्यैश्वर्यस आ
त्मनः॥ विघ्नयागजपारंभहवनांतनिमित्तकं॥ मधुपर्कविधिं तद्विस्तरणं पुण्यवाचनं॥ कर्मत्रयं करिष्योहं कुरुध्वे
नीरितेपरैः॥ ३०॥ अथ मधुपर्कोपहारः॥ विप्राद्युपहारांस्तां आहरेद्दक्षिणां दिशं॥ मधुपर्कविधानार्थं प्रति विप्रं

व स्त्र

८ पृथक् पृथक्॥ ३१॥ विष्टरावुभौ पानीयमर्घ्यमाचमनीयकं॥ मधुपर्कोनुलेपश्च पुष्पोपवीत कंचुकं॥ ३२॥ उ
ष्णीषालंकृतिश्छत्रमुपानद्वौ कमंडलुं॥ आज्ञापयैतान् द्विजानाह साधु भवंत आसतां॥ ३३॥ यथाशक्त्यार्चयि
ष्यामो भवतोऽन्योक्तिरर्चय॥ विष्टरो विष्टरो विष्टरः प्रतिगृह्यतां॥ ३४॥ एतावदर्चेकः प्राङ्प्रतिग्र
हीम ऋत्विजः॥ इत्यादिमधुपर्कोण वैनाख्यानि वतान् द्विजान्॥ ३५॥ अभ्यर्च्य वरणीयास्ते ऋत्विग्वरणक
र्मणा॥ अन्यच्च॥ यजमानहस्ते अर्घः॥ यजमानपत्नीहस्ते सफलः कलशः॥ शांतिसूक्तपाठः॥ सुमुख
श्चैकदंतश्चेति सर्वे पठेत्॥ अत्राद्येति॥ इह भुवनकोशे॥ मम क्षेमायुरारोग्यं परमश्रीसुखाप्तये॥
भार्यादिसर्वकार्यस्य चिंतितार्थस्य सिद्धये॥ ३६॥ आधिव्याधिजरामृत्युभयशोकनिवृत्तये॥ भूतभव्य
भविष्येति त्रिविधोत्पातशांतये॥ ३७॥ सर्वेन सामपर्घ्यं स्त्यै निवृत्त्यै च द्विषां तथा॥ परमैश्वर्यसंपत्त्यै निष्प

न्येजपकर्मणः॥ ३८॥ पुत्रपौत्रादिसंपत्त्येतथानेजोऽभिवृद्धये॥ विनियस्यविवेकस्यकरिष्यमाणकर्मणः॥
३९॥ अनावृत्तेऽकसौभाग्यसुखसौंदर्यसिद्धये॥ विनियस्यविवेकस्ययज्ञस्याचनपाश्रियः॥ ४०॥ ममस्वभार्य
[illegible]ोटिकल्पावच्छिन्नश्रीमहाविष्णाश्रितवैकुंठपदप्राप्तयेश्रीविष्णुसंतोषणार्थेविष्णुयागाख्यकर्मनिमि
त्तंयथाशक्तिआचार्यादिसमस्तऋत्विजांअर्घादिसंपादनमहंकरिष्ये॥ अथवाब्रह्मनाचार्यादिसमर्ना
समस्तऋत्विजांअर्घसंपादनमहंकरिष्ये॥ ॥आदित्याद्याग्रहाःसर्वेराहुकेतुपुरःसुराः॥ पावनाःसर्व
वर्णानांब्राह्मणाब्रह्मरूपिणः॥१॥ स्वागतंभोद्विजश्रेष्ठाःमदस्तु॥ ॥अर्घोअर्घःप्रतिगृह्यतांप्रतिगृह्णा
मि॥आचार्यंप्रथमंसपत्नीकोयजमानउदङ्मुखोवृणुयात्॥ ब्रह्माणंवृणुयात्॥ आवाहयामिदेवेशंब्र
ह्माणंकमलोद्भवं॥ चतुर्वेदसमायुक्तंसर्वसिद्धांतवेदिनं॥ यद्गोत्रप्रवरंविप्रमृग्वेदिनंचशाखिनं॥क

९ र्मिणविष्णुशर्माणं ब्रह्माणं त्वामहं वृणे॥ आवाहयामि देवेशमाचार्यं यज्ञकारिणं॥ पुराणन्यायमीमांसी सर्व
शास्त्रार्थपारगं॥ शांडिल्यगोत्रप्रवरं शांडिल्यासितदेवलं॥ यजुर्वेदमधीयानं वाजसनेयशाखिनं॥ जपार्थं
जपयज्ञेस्मिन्जापकं कृष्णसंज्ञकं॥ उत्तमश्रीसुसुखाद्यर्थं आचार्यं त्वामहं वृणे॥ एवं यस्य च यद्गोत्रं यथा
वत्प्रवरं वरं॥ यद्वेदाध्यायिनं विप्रं यछाखाध्यायिनं पुनः॥ जपिनं रामरत्नामानमृत्विजं त्वामहं वृणे॥ वृ
तोऽस्मीति द्विजेनोक्ते ब्रूते वरुणकारकः॥ ॥ नानागोत्रास्तथा नानाप्रवरा विष्णुतत्पराः॥ स्वस्ववेद
मधीयानाः कुलीनाः स्वस्वशाखिनः॥ श्रुताध्ययनसंपन्नाः पंक्तिपावनपावनाः॥ अक्रोधना अनूचाना नाना
नानामान ऋत्विजः॥ युयं मया वृतास्थेति वृतास्म ऋत्विगिरिते॥ गुर्वादिभ्यः समस्तेभ्यः ऋत्विग्भ्य इदमा
सनं॥ गंधं पुष्पं च धूपं च दत्वा कल्पं तु नद्यथा॥ नानागोत्रेभ्य ऋत्विग्भ्यो नानानामभ्य एव च॥ यथा विप्रं यथा

दत्तं गंधाद्यमिदमर्चनं॥ स्वाज्ञासंपद्यतां तेभ्यः सर्वेभ्योऽध्वर्युमुख्यतः॥ यथोपपन्नेन ब्राह्मणं तर्पयिष्यति॥
तेनाग्नेन्नेनाद्य कर्मांगदेवताप्रीयतामिति॥ अथ वरणोपहारः॥ ऋत्विग्वरणसंभारा भाजनाच्छादनाद
यः॥ भाजनं भाजनाधारछत्रोपानत्कमंडलुं॥ आसनं वसनं मुद्राकर्णभूषोपवीतकं॥ एतद्दशविधं देयं
यद्वरणसिद्धये॥ यद्दाभावे त्रयं देयं पात्रवस्त्रांगुलीयकं॥ तदभावेऽथ तांबूलं दत्वा किंचित्प्रकल्पये॥
वर्णांगोपहाराणां पात्रांगुलीयवाससां॥ सर्वेषां निष्क्रये द्रव्यं यथोपपन्नमृत्विजे॥ यथाप्रवरगोत्राय य
थावेदोक्तशाखिने॥ स्वाज्ञासंपद्यतां तस्मै यथानाम्ने द्विजन्मने॥ शिवा आपः करे कृत्वा प्रयोगो दक्षिणार्प
णे॥ यथागोत्रेभ्य ऋत्विग्भ्यो यथाशर्मभ्य इच्छया॥ दक्षिणा दक्षिणीयेभ्यो वितीर्णा कर्मसिद्धये॥ गोदानं वा
हिरण्यं वा रूप्यं वा कल्पमेव वा॥ तन्निष्क्रये यथा यत्किंचित्तांबूलं फलमेव वा॥ ऋत्विग्वरणपूजार्थं स्वाज्ञासं

१० पद्यतांतुतत्॥यस्यविप्रस्ययोभागः।सभागस्तेनगृह्यतां॥प्रीयतांभगवत्यस्तास्तेनकर्मांगदेवताः॥अस्यजपांग
भूतस्यऋत्विग्वरणकर्मणः॥विधेन्यूनातिरिक्तंयत्सर्वंसंपूर्णमस्तुतत्॥श्रीविष्णोःप्रीतयेविप्राःपाद्यार्घंवो
ददाम्यहं॥मंडपस्यगृहेकुर्यात्मंडपान्वाद्यशास्त्रवित्॥ब्रह्माद्याचार्यकश्चैवऋत्विजस्तुयथाक्रमं॥प्रथमं
पादशौचंतुकृत्वातद्दिनिवेशयेत्॥प्रथमंब्रह्मावरणं॥आचार्यवरणंवाकर्तव्यं॥राज्ञोवरणं॥अमुकगोत्रं०
स्वीकृतवैष्णवयागकर्मणिआचार्यत्वामहंवृणे॥वृतोऽस्मि॥एवंब्रह्मादिऋत्विजांवरणं॥तद्दत्तवरणमेव
कर्तव्यं॥पूर्वंविष्णुमंत्रवेदोक्तसहस्रशीर्षेदंविष्णुमंत्रजपार्थंतथाचागमोक्तविष्णुमंत्रजापकानांवरणं॥॥श्री
मन्नारायणाष्टाक्षरगोपालमंत्रवासुदेवद्वादशाक्षरजापकानांवरणं॥तदनुपारायणिपाठऋग्वेदादिजाप
कपाठकानांवरणं॥ ॥ततःशिवप्रीतयेरुद्रीएकादशब्राह्मणानांवरणं॥मृत्युंजयजापकस्यवरणं॥सप्तश

तीजपार्थं शतचंडध्यर्थं ब्राह्मणानां वरणं॥ ग्रहैर्गणपतिमंत्रजापकस्य वरणं॥ वास्तुमंत्रजपार्थं वरुणं॥ ग्रहमंत्र
जापकानां द्वयानां वरणं॥ एवं सर्वे मिलिताः॥ एकशतं अष्टाचत्वारिंशद्वरणीयाः॥ १४८॥ एवं ऋत्विजां वरणं
विधाय॥ स्वपाद प्रक्षालनं कृत्वा॥ पूर्वे सपत्नीको यजमानः पश्चिमद्वारेण प्रवेशं करोति॥ तदनु सर्वे ब्रा-
ह्मणाः प्रवेशं कुर्युः॥ प्रवेशमंत्रस्तु॥ भद्रं कर्णेभिः॥ स्योना पृथिवी नि मंत्रेण स्वासने प्राङ्मुखो यजमान उ
पविश्य॥ आचार्यादयः उदङ्मुखाः सर्वे उपविशेयुः॥ तेषां वर्णोर्चनं कुर्यात्॥ तत्र अर्चनं मधुपर्कविधिना
वेदोक्तमंत्रेण॥ तत्प्रकारमाह॥ आचमनादि उपचार प्रोक्षणं कृत्वा॥ अत्राद्येति०॥ मम अविघ्नपत्तार्थं सर्वे
षां ऋत्विजां मधुपर्कविधिना अर्चयेत्॥ शंनो देवी०॥ अथ रेभवतु लेति मंत्रद्वयं पठित्वा॥ साधु भवान् आस्ता०
॥ यज्ञानां सप्तमान रोरुक॥ अग्नये गायत्राय त्रिवृते॥ अथ मति परेस्यगा ईपतिं यजुः॥ ॥ गावो ह्या ३ साम॥ इति

मधुपर्कंतुमासदेत्॥ॐभूर्भुवः स्व

११ अर्घदानंऋत्विजां॥ ॥सआजगामगौतमइतिमंत्रेणप्रथमंविष्टरंआसनेदद्यात्॥समुद्रंगच्छेतिमंत्रेणपाद
शौचंतुकारयेत्॥वृष्मऊर्म्मिरसीतिमंत्रेणविष्टरंपाद्योर्न्यसेत्॥वरुणस्यैत्वंभनामितिमंत्रेणअर्घंदद्यात्प्रय
त्नतः॥पूर्णअर्घेस्वीकरणंउदानीदानं॥ ॥ॐभूर्भुवःस्वरितिमंत्रेण॥आचमनंचैवकारयेत्॥मित्रस्यत्वेतिमंत्रे
णमधुपर्कंददानिवै॥देवस्यत्वेतिप्रतिगृह्णानि॥मधुवातेतिमंत्रेणगौश्वस्पर्शनेमतं॥ ॥तत्सवितुरितिमंत्रे
णपुनराचमनंनवेत्॥मनस्तआप्यायेतिमंत्रेणगोश्वस्पर्शनंमतं॥तत्सवितुरितिमंत्रेणगोगौरितित्रिश्र
यात्॥मातारुद्राणांइतिमंत्रेणममचामुष्यचपाप्माहत॥याओषधीरितिमंत्रेणअर्चयेत्चंदनेनवै॥गं
धद्वारेतिमंत्रेणगंधंदद्यात्प्रयत्नतः॥श्रीश्चतेतिमंत्रेणपुष्पंदद्यात्प्रयत्नतः॥धूरसितिमंत्रेणधूपं
नत्वप्रदापयेत्॥वाचस्पतयेतिमंत्रेणवस्त्रदानंविधीयते॥युवासुवासाइतिमंत्रेणउष्णीषंतुप्रदापयेत्॥

हिरण्यवर्णामितिमंत्रेणकुंडलेमुद्रिकांचप्रदापयेत्॥ श्रद्धयोदत्तेतिमंत्रेणपुष्पमालांददातिवै॥अन्न
पतेतिमंत्रेणपात्राणिचैवदापयेत्॥फलसामेतिमंत्रेणफलतांबूलंचप्रतिपादयेत्॥हिरण्यगर्भेति
मंत्रेणदक्षिणांचैवदापयेत्॥नस्यैधेनुरितिमंत्रेणधेनुंदद्यात्पयस्विनीं॥पश्चात्संकल्पःकार्यः॥
हिरण्यंवास[illegible]मात्रंउष्णीषंकुंडलेतथा॥मुद्रिकांमधुपर्कंचगांचैवतुपयस्विनीं॥ ब्राह्मणेभ्योमया
दत्तंप्रीयतांमेप्रजापतिः॥ ब्राह्मणेभ्योमयादत्तंप्रीयतांमेबृहस्पतिः॥ ऋग्वेदायमयादत्तंसोमो
मेप्रीयतामिति॥ यजुर्वेदायमेदत्तंसोमोमेप्रीयतामिति॥ सामवेदायमेदत्तंसोमोमेप्रीयतामिति॥
अथर्ववेदायमेदत्तंसोमोमेप्रीयतामिति॥ विष्णुमंत्रजापकेभ्योमयादत्तंविष्णुर्मेप्रीयतामिति॥रु
द्रजापकेभ्योमयादत्तंरुद्रोमेप्रीयतामिति॥ एवमेषांतुविप्राणांदत्वादेवान्समर्पयेत्॥एवंसर्वेषां

१२ ऋत्विजांतत्तदेवनोशेनदानं॥ पश्चात्ब्राह्मणान्प्रार्थयेत्॥ ब्राह्मणाः संतुमेशास्ताः०॥ आचार्यस्तुयथा
स्वर्गं०॥ एवंब्रूयाच्चकर्त्तावैऋत्विजांतुपृथक्२॥ ब्रह्मयज्ञानमंत्रस्तुब्रतोब्रह्मा ननोजपेत्॥ बृहस्पतेतिमं
त्रस्तुआचार्यस्तुवृतोजपेत्॥ ॥अग्निमीळेतिमंत्रेणऋग्वेदीचवृतोजपेत्॥ इषेत्वेतिमंत्रस्तुयजुर्वेदी
वृतोजपेत्॥ ॥अग्नआयादिमंत्रस्तुसामवेदीवृतोजपेत्॥ ॥शन्नोदेवीतिमंत्रस्तुअथर्वाणवृतोजपे
त्॥ ॥इतिश्रीवैष्णवसिद्धांतेब्रह्मानारदसंवादेविष्णुयागेवर्णार्चनप्रकरणंत्तृतीयं॥ ॥अथपुण्या
हवाचनं॥ आचार्यादिभिर्यजमानस्यकर्त्तव्यं॥ संपूज्यगंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत्०॥
अवनीकृतजानु० इत्यारभ्य॥ भोब्राह्मणाः ममसपरिग्रहे इत्यंतंपूर्ववत्०॥ अस्मिन्विष्णुयागेपु-
ण्याहवाचनयोर्विशेषोब्रह्मणोक्तनारदंप्रतिविष्णुयज्ञेप्रकरणेशौःसःकर्त्तव्यः॥ तत्प्रकारमाह॥ ॥

ब्राह्मणाःसुप्रचेतसोभवंतु॥भवाममः॥सुप्रचेतसोऽस्मान्प्रसीदंतु॥प्रसन्नास्म॥शांतिरस्तुपुष्टिरस्तु॥पद्यछ्रे
पन्नदस्तु॥यत्पापंरोगंदुरितंनत्प्रतिहृनमस्तु॥द्विपदचतुष्पदेभ्यःसुशांतिर्भवतु॥अविघ्नमस्तु॥आरोग्यम
स्तु॥आयुष्यमस्तु॥सर्वकर्मसमृद्धिरस्तु॥वेदसमृद्धिरस्तु॥शास्त्रसमृद्धिरस्तु॥धनधान्यसमृद्धिरस्तु॥अ
निष्टनिरसनमस्तु॥पद्यछ्रेयस्तन्नदस्तु॥तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नदिग्देवताःसुभाःसंपद्यंतां॥
आदित्याद्याग्रहाःप्रीयंतां॥इष्टदेवताःप्रीपंतां॥इष्टाःकामाःसंपद्यनां॥सुमुहूर्त्तानिप्रीपंतां॥सनकाद-
यो मुनिगणाःप्रीपंतां॥मोदादयोविनायकाःप्रीपंतां॥इंद्रादयोदिक्पतयःप्रीपंतां॥अर्यमादयःपितृग
णाःप्रीपंतां॥ध्रुवादयोवसवःप्रीपंतां॥भूरादयःसप्तलोकाःप्रीपंतां॥गौर्यादयोमातरःप्रीयंतां॥घृता-
च्यादयोऽप्सरसःप्रीपंतां॥ऐरावतादयोदिग्गजाःप्रीयंतां॥क्षीरसमुद्रादयःसप्तसागराःप्रीपंतां॥

१३ गंगाद्याः सरितः प्रीयंतां॥ मेर्वादयः कुलपर्वताः प्रीयंतां॥ पुष्करादयो मेघाः प्रीयंतां॥ चंदनादयो द्रुमौषधयः
प्रीयंतां॥ ऋग्वेदादयो वेदाः प्रीयंतां॥ एकोनपंचाशत्मरुद्गणाः प्रीयंतां॥ गार्हपत्यादयोऽग्नयः प्रीयंतां॥
मन्वादिस्मृतिपुराणशास्त्रतर्कसूत्राणि प्रीयंतां॥ अश्विनादयो नक्षत्राणि प्रीयंतां॥ विष्कुंभादयो योगाः
प्रीयंतां॥ बवादयः करणाः प्रीयंतां॥ आदित्यादयो वाराः प्रीयंतां॥ प्रतिपदादयस्तिथयः प्रीयंतां॥ प्रभवा
दयः संवत्सराः प्रीयंतां॥ कृतादीनि युगानि प्रीयंतां॥ वसंतादय ऋतवः प्रीयंतां॥ चैत्रादयो मासाः प्रीयं
तां॥ अश्वमेधादयो यज्ञाः प्रीयंतां॥ पुष्कराद्यानि तीर्थानि प्रीयंतां॥ एकादश्यादीनि व्रतानि प्रीयंतां॥ भू
रादीनि भुवनानि प्रीयंतां॥ भूरादयो व्याहृतयः प्रीयंतां॥ गार्ग्यादीनि गोत्राणि प्रीयंतां॥ भगंदरादयो रो
गाः नश्यंतां॥ वैलक्षण्यादयः स्वभावा नश्यंतां॥ विकाराः सर्वे नश्यंतां॥ कव्यवालादयः पूर्वजाः प्रीयंतां॥

मित्रादयः इष्टाः प्रीयंतां॥ नद्यादयोधेन्वः प्रीयंतां॥ अश्वादयः पशवः प्रीयंतां॥ जरायुजादयोजीवाः
प्रीयंतां॥ ब्रह्मचर्यादयः आश्रमाः प्रीयंतां॥ स्थावरादयोयोगाः प्रीयंतां॥ सिद्धयोधकादयोक्षेत्राधी
शाः प्रीयंतां॥ रस्येंद्रादयोनयनाथाः प्रीयंतां॥ सिद्धमाधकादयो योगीश्वराः प्रीयंतां॥ सरस्वत्यादयो
देव्यः प्रीयंतां॥ आदित्यादयः स्त्रियः प्रीयंतां॥ प्रल्हादादयो दैत्याः प्रीयंतां॥ कस्यपादयः प्रजापत्यः प्री
यंतां॥ येकेचिन्नविस्मृतास्तेसर्वे प्रीयंतां॥ बहुपुत्रंबहुधनंचायुष्यंचास्तु॥ उत्तरेकर्मण्यविघ्नमस्तु॥
पुण्याहंभवंतोब्रुवंतु॥ इत्यादिसर्वेपुण्याहवाचनंसमाप्तं॥ ॥इतिश्रीवैष्णवसिद्धांतेविष्णुयागेपु
ण्याहवाचनं॥ अथमंत्रपाठः॥ यजमानः सपत्नीकोदद्यात्तेषांचदक्षिणां॥ विष्णुयागस्यनिष्पत्त्यैभ
वंतोभ्यर्थितामया॥ सुप्रसादंप्रकर्त्तव्यमेतत्कर्मयथाविधि॥ ॥अथानन्तरंवर्द्धनीपुण्यार्थंनीयंत-

१४ रात् जलआहरणं॥ तत्रसपत्नीकोयजमानोगत्वा गीतवादित्रैः सह वरुणं संप्रार्थ्य जलमानयेत्॥ ज
लाहरणानंतरं वर्धनी प्रार्थना॥ वर्धनी पूरणार्थं तीर्थान्यावाहयेत्॥ आवाहनमाह॥ ॥तीर्थान्यावा
हयेत्तविद्वान् समुद्रान् सरितोह्रदान्॥ प्रभासं पुष्करं गयां चैवमार्कंचपुष्करंगयां॥ गंगा च यमुनां चै
व चंद्रभागा यद्वानदी॥ आवाहितानि तीर्थानि चागछंतु मखेमम॥ अथकलशेजलपूरणं॥ यजमा
नकंठेप्रगृह्य शनैः शनैः सपत्नीकः पूरयेत्॥ मंत्रान् ब्राह्मणाः पठेयुः॥ तानाह॥ ॥ पठेयुर्ब्राह्मणाः
सर्वेआचार्येस्तु समाहितः॥ समुद्रज्येष्ठेति वैसूक्तं समुद्रंगछ एवच॥ समुद्रायत्वावाताय समु-
द्रोसीति तथैवच॥ इमंमेप्रतिमंत्रेण पूरयित्वा जलं शुभं॥ ततोसपत्नीकोयजमानः जलं गृहीत्वा
गृहमागछेत्॥ ऋत्विग्भिः सह॥ आगत्यमंडपे पश्चात् ततो यं मणिके क्षिपेत्॥ वेद्याः पश्चिमदिड्या

गे अष्टदलं कृत्वा तदुपरि वर्द्धनीं स्थापयेत्॥ वर्धनीं प्रार्थयेत्॥ वर्धनी त्वं महाभागा महातीर्थोद
कान्विता॥ नवतोयेन कलशान्॥ यज्ञार्थं पूरयाम्यहं॥ वेदीमध्ये चतुरस्त्रं चतुर्द्वारं गृहं कृत्वा॥
मध्ये चाष्टदलं कृत्वा॥ कर्णिकायां हैमं राजतं ताम्रं वा कलशं संस्थाप्य॥ परितः पत्रे अष्टमहासि
द्धिः स्थापयेत्॥ अणिमा लघिमा चैव महिमा प्राप्तिमा तथा॥ प्राकाम्या च वशित्वाख्या दूरदर्शन
मेव च॥ दूरश्रवणमित्युक्ता स्थापयेत्तेऽष्टसिद्धयः॥ ततोऽनंतरं कलशपूरणं॥ ततः सर्वेषां
कलशानां पूरणं॥ तथा चोक्तं पार्थसौ [illegible]॥ सर्वौषधी समायुक्ताः वर्द्धनीजलपूरिताः॥ सोपस्करा
श्च विधिवत् पूर्वं द्वारादिषु क्रमात्॥ संस्थाप्य कलशान् विधिवत्॥ ततो भूरसीत्यादिभिः चक
लशमंत्रैः ऋग्वेदादिक्रमेण स्वैः स्वैर्मंत्रैः केचित्त्रिभिः स्थापनं कर्तव्यं॥ ॥ततो मनो ज्योतिरितिमंत्रैः

१५ स्वैःस्वैःशाखोक्तैःप्रतिष्ठाकरणं॥ ॥अथप्रार्थना॥ पूजनपूर्विका॥ इदमत्रचंदनंपुष्पं॥ ॥इतिलधुपूजांविधा
य॥ ईशानादिपीठेषुपूर्वेअग्निदक्षिणनैर्ऋतिवायूत्तरस्थितेषुपीठेषुतदुपरिस्वस्तिकंकृत्वा॥ श्वेतरक्तपटकु
लैराछादितेषुतदुपरिश्वेततंदुलैःस्थापयेत्॥ प्रत्येकंस्थापयित्वा॥ कलशान्स्थापयेत्॥ मूर्तिनांसर्वासांद
शविधिनासंस्थाप्य॥ वस्त्रुत्तारणंकृत्वा॥ प्रतिष्ठापयेत्॥ पूजयेत्॥ पूजांविधायप्रार्थयेत्॥ अथातःसंप्र
वक्ष्यामिश्योकलशसंभवोयथा॥ क्षीरोदमथनोद्भूतःकलशस्तेनचोच्यते॥ अथकलशमानं॥ षडंगुलोमुखः
प्रोक्तःकंठेचचतुरंगुलः॥ उछ्रायोविस्तरश्चैवचतुर्विंशतिषोडश॥ अकालबुध्नःसुसमःसर्वदोषविवर्जि
तः॥ उत्तरेहिमवत्पार्श्वेक्षीरोदोनामसागरः॥ प्रारब्धंमंथनंतत्रदेवैःसर्वैश्चदानवैः॥ सर्वैस्तुबलिमुख्यै
श्चबलिभिर्बलशालिभिः॥ मंथानंमंदरंकृत्वानेत्रंकृत्वातुवासुकिं॥ मूलेकूर्मंचसंस्थाप्यविष्णुनामंदरोधृतः॥

एकत्रदेवताः सर्वाबलिदानवमेकतः॥ मथ्यमानेतदातस्मिन् क्षीरोदोदेवदानवैः॥ उत्पन्नानिचरत्नानिया
निनासन्कदाचन॥ विमानपुष्पकंपूर्वंउत्पन्नोहिसुवाहनं॥ नागेशेरावतश्चैवपारिजातस्तथैवच॥ वीणा
दिभिः सपायुकारंभानृत्यगणान्विता॥ मणिस्तुकौस्तुभश्चैवचंद्रश्चैवतथैवच॥ कुंडलेचविषंपंचगाव-
श्चैवतथैवच॥ नंदासुमनसाचैवसुशीलाचसभद्रिका॥ पंचमीसुरभीप्रोक्तात्विमेताः पंचधेनवः॥ उत्प
न्नंचामृतंतत्रभाजनेनविनातदा॥ निर्मितोविश्वकर्त्राचकलशः कामरूपधृक्॥ कलाधरोहिदेवानांदा
नवानांतथैवच॥ निर्मितोऽथपुरादेवैः कलशस्तेनचोच्यते॥ कलशस्यमुखेब्रह्माग्रीवायांवृषभध्वजः॥
कुक्षौतुसागराः सप्तसप्तनद्यश्चयाः स्मृताः॥ अर्जुनीगोतमीचैवचंद्रभागासरस्वती॥ तापीगोदावरी
चैवनर्मदाचमहानदी॥ विष्णुपादोद्भवाः शैलाः शैलेभ्योयाचनिःसृताः॥ प्रभासंपुष्करंचैवनैमिषंचहिमालयं॥

१६ वीरेश्वरं त्रिमूर्तिं च गंगासागरसंगमं॥ पृथिव्यां यानि तीर्थानि तडागादीनि यानि वै॥ अत्र शांतिश्च पु-
ष्टिश्च गायत्री च तथैव च॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदस्तथैव च॥ अथर्वसहिता वेदाः कलशे ऽङ्गिस
माश्रिताः॥ अनेनामृतमंत्रेण ब्रह्मणा निर्मितेन च॥ कलशेन सुमंत्रेण यः कुर्यादभिषेचनं॥ आयुरा
रोग्यमैश्वर्यं लभेत्कामांश्च पुष्कलान्॥ यत्फलं कपिलादाने सुवर्णदानतः फलं॥ ब्राह्मणो लभते
विद्यां पार्थिवो लभते महीं॥ वैश्यस्तु लभते लाभं शूद्रस्तु सुखमश्नुते॥ वंध्या च लभते गर्भं पुत्रार्थी पुत्र
मुत्तमं॥ कलशस्य समाख्याता चोत्पत्तिस्तु सुलक्षणा॥ नामधेयं च यजनं स्थानं चैवाधिदेवता॥ यः
शृणोति नरो भक्त्या सर्वपापैः प्रमुच्यते॥ कलशे देवताः पंच मंत्रतंत्रसमन्विताः॥ ब्रह्मा विष्णुश्च रुद्रश्च
ईश्वरश्च सदाशिवः॥ त्रयस्त्रिंशत्तु ये देवाः कलशेस्मिन् प्रतिष्ठिताः॥ ध्यायेद्देवं परं शांतं ध्यायेत्पूर्वादितः क्रमात्॥

सिद्धार्थं गुग्गुलं धूपं सर्वौषधिसमन्वितं॥ न्यग्रोधोदुंबरोऽश्वछचूतजंबुत्वचस्तथा॥ तत्पल्लवाश्चकुंभेषु सप-
त्रास्तेषु निक्षिपेत्॥ अमृतेमथ्यमानेतु पुरादेवैः सदानवैः॥ तस्य संग्रहणार्थाय शिवेन रचिताः पुरा॥ गूढो नि
गूढो जनह्राजयंतश्चापराजितः॥ विराजो दुंदुभिश्चैव त्वष्टमोऽथ प्रजापतिः॥ विजयोनामतश्चैते कलशास्तु
पुरास्मृताः॥ नवमोयः समाख्यातो नवमो नामनामतः॥ अहं तत्र स्थितश्चैव सर्वपापहरः शिवः॥ तत्पं
चमुखो लोके सर्वकामप्रसाधकः॥ पश्चिमे च मुखे सद्यः वामदेवस्तथोत्तरे॥ पूर्वे तत्पुरुषः प्रोक्तो वाघो
रश्चापि दक्षिणे॥ ईशानश्चोर्ध्व विख्यातं सर्वेशश्चोपरिस्थिताः॥ क्षितिजः प्रथमः कुंभः द्वितीयः काल
संभवः॥ तृतीयः पवनाज्जातो चतुर्थश्च हुताशनात्॥ पंचमश्चंद्रमसोजातः षष्ठश्च कालजस्तथा॥ स
प्तमः पन्नगाजात आदित्यादष्टमः स्मृतः॥ एते पूर्वादितो न्यस्या ईशानादिमथापि वा॥ अष्टमूर्त्तिः स्थितो

१७ यस्मात्दलेऽथपद्मजेशयोः॥ मूर्त्तिरष्टौदलेन्यस्यकर्णिकायांशिवःस्मृतः॥दलानिपरितोनागायेग्रहा
स्तेदलेस्मृताः॥एतत्सर्वंमयापूर्वंब्रह्मांडंसचराचरं॥यथावित्तंयथाकार्यःसौवर्णोराजतोऽथवा॥ता
म्रोवापिप्रकर्त्तव्यःसर्वलक्षणलक्षितः॥संस्थाप्यकलशान्सर्वान्प्रतिष्ठाकलशेस्मृता॥ ॥ ॥इति
श्रीवैष्णवसिद्धांतेब्रह्मानारदसंवादेविष्णुयागमाहात्म्येकलशस्थापनविधिः॥ चतुर्थंप्रकरणं॥ ४॥

www.vallabhacharyaagrahara.org